22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२५**

**सत्र ५ वे**

**विषय:रत्नावली (22E455)**

**दिनांक :** १९/०५/२०२५ **गुण :**१०० **वेळ :** दु. २.०० ते ५.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. मातृभाषया चतुर्णामनुवादः करणीयः।** (३०)

१. अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोद्गमद्वह्निनि।
आहूयाऽजिमुखे स कोसलपतिर्भग्ने प्रधाने बले एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः।।
२. औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताऽऽभिमुख्यं पुनः।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः।।
३. किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नाऽलोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्ययं पदपरः शीतांशुरुज्जृम्भते दर्पः स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे।।
४. नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः।।
५.श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुनः मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः।।
६.बाणाः पञ्च मनोभवस्य नियतस्तेषामसङ्ख्यो जनः प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीतमधुना यस्मादसङ्ख्यैरयं विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्।।

**प्र.२. ससन्दर्भं त्रयाणां स्पष्टीकरणं लिखत।** (२०)

१. भवति, न मे ईदृशे प्रस्तावे एतद्रोढुं हस्तः प्रसरति।
२. रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता।
३. अहो प्रमादः परिजनस्य।
४. सखे इयमनभ्रा वृष्टिः।
५. मुखरा खल्वेषा गर्भदासी।
६. दुरवगाहा गतिर्दैवस्य।

**प्र.३. टिप्पणीत्रयं लिखत।** (३०)

१. यौगन्धरायणः। २. वसन्तोत्सवः। ३. भरतवाक्यम्। ४. नाटिका।

**प्र.४. सविस्तरम् एकं लिखत।** (१०)

१. चतुर्थाङ्कस्य रसग्रहणं करणीयम्।
२. विदूषकस्य महत्त्वं स्पष्टीकुरुत।

**प्र.५. अ) रूपपरिचयं लिखत।** (०३)

१. ईक्षते २. भ्रान्त्वा ३. इमानि

**आ) सन्धिविग्रहं कुरुत।** (०३)

१. आकर्ण्याग्रतोऽवलोक्य २. मद्दृष्टिस्तृषितेव

**इ) समासविग्रहं नामनिर्देशपूर्वकं कुरुत।** (०४)

१. कलानिपुणः २. यथाकालम्

----------